# 2022

# 1st Semester Examination

# SANSKRIT

## Paper : SANS - 105

Full Marks : 40 Time : 2 Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः ।

1. प्रश्नद्वयं समाधेयम् : 10×2=20

(क) दुःखनिवृत्तेः हेतुविषये कथं जिज्ञासा जायते? दुःखस्य भेदाः दुःखनिराकरणोपायाश्च ईश्वरकृष्णानुसारमालोच्यन्ताम्।

अथवा

(ख) सांख्यमते सत्कार्यवादः आलोच्यताम्।

(ग) शब्दानुशासनस्य मुख्यप्रयोजनानि भाष्यदिशा निरूप्यन्ताम्।

अथवा

(घ) शब्दानामुपदेशप्रक्रिया पतञ्जलिदिशा वर्ण्यताम्।

2. सप्रसङ्गं द्वयोर्व्याख्या कार्या : 5×2=10

(क) प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम्।
तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनन्तु॥

(ख) भेदानां परिमाणात् समन्वयात्कार्यतः प्रवृत्तेश्च।
कारणकार्यविभागादविभागाद् वैश्वरूपस्य॥

(ग) जननमरणकरणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव॥

3. सप्रसङ्गं द्वयोर्व्याख्या कार्या : 5×2=10

(क) अथ शब्दानुशासनम्।

(ख) सवाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।

(ग) प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते।

# 2022

## 1st Semester Examination

## SANSKRIT

### Paper : SANS - 102

### (Old Syllabus)

Full Marks : 40 Time : 2 Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

सर्वे प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः ।

1. चत्वारः समाधेयाः — 4×2=8

(क) ऐतरेयब्राह्मणस्य नामकरणे किं बीजम् ?

(ख) अजीगर्तस्य कति पुत्राः ? तेषां नामानि लिख्यन्ताम् ।

(ग) शतपथब्राह्मणे कति महायज्ञा आलोचिताः ? के च ते ?

(घ) केनोपनिषदः सम्बन्धः वेदः कः ? ब्राह्मणञ्च किम् ?

(ङ) 'नेदं यदिदमुपासते' इत्यत्र 'नेदम्' इति पदेन कस्य बोधो भवति ?

(च) नचिकेता कस्य गृहं गतवान् ? तत्र कति दिवसाः निवसिताः ?

(छ) कीदृशाः गावः नचिकेतसः पिता दक्षिणारूपेण दातुमुद्यतः ?

P.T.O.

2. चतुर्णां व्याख्या कार्या : 4×4=16

(क) अहरहो भूतेभ्यो वलिं हरेत्। तथैव भूतयज्ञं समाप्नोति।

(ख) अहरहः स्वधा कुर्यादुदोपात्रात् तथैव पितृयज्ञं समाप्नोति।

(ग) कलिः शयानो भवति सञ्जिहानस्तु द्वापरः।
उत्तिष्ठंस्त्रेता भवति कृतं संपद्यते चरन्॥

(घ) चरन्वै मधु विन्दति चरन्स्वादुमुदुम्बरम्।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरंश्चरैवेति॥

(ङ) यद्वाचानभ्युदितं येन वागभ्युद्यते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥

(च) यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥

(छ) नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्यस्तस्यैव आत्मा विवृणुते तनुस्वाम्॥

(ज) श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।
श्रेयो हि धीरोऽभि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते॥

3. प्रश्नद्वयं समाधेयम् : 8×2=16

(क) पञ्चानां महायज्ञानां नामान्युल्लिख्य ब्रह्मयज्ञस्वरूपं फलञ्च संक्षेपेण शतपथोक्तदिशा विव्रियेताम्।

(ख) शुनःशेपोपाख्यानस्य सामाजिकदृष्ट्या तात्पर्यं विशिलष्यताम्।

(ग) उपनिषद्–इति शब्देन किं बोध्यते? केनोपनिषदः परिचयः प्रदेयः।

(घ) नचिकेतसे के वराः प्रदत्ताः? नचिकेतसा प्रार्थितानां वराणां क्रमव्यवस्थायाः तात्पर्यमुल्लिख्य द्वितीयवरस्वरूपं विशदनीयम्।